## आयुधाच्छ च। (१४/१५६४)

[1]आयुधशब्दात् छ प्रत्ययो भवति, चकाराट् ठंश्च, [2]जीवति इत्येतस्मिन् [3]विषये। आयुधेन जीवति आयुधीयः, आयुधिकः ॥

## हरत्युत्सङ्गादिभ्यः। (१५/१५६५)

[4]तेन इत्येव। उत्सङ्गादिभ्यस्तृतीयासमर्थेभ्यो हरति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। हरतिर्देशान्तरप्रापणे वर्तते। उत्सङ्गेन [5]हरति [6]औत्सङ्गिकः। औडुपिकः।

[7]उत्सङ्ग। उडुप। [8]उत्पत। [9]पिटक। उत्सङ्गादिः ॥

## भस्त्रादिभ्यः ष्ठन्। (१६/१५६६)

भस्त्रा इत्येवमादिभ्यः तृतीयासमर्थेभ्यः हरति इत्येतस्मि[10]न्नर्थे ष्ठन् प्रत्ययो भवति। भस्त्रया हरति भस्त्रिकः। भस्त्रिकी। [11]भरटिकः। भरटिकी।

भस्त्रा। भरट। भरण। शीर्षभार। शीर्षेभार। अंसभार। अंसेभार। भस्त्रादिः ॥

## विभाषा विवधवीवधात्। (१७/१५६७)

हरति इत्येव। विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषा ष्ठन् प्रत्ययो भवति। तेन मुक्ते[12] प्रकृतः ठग् भवति। विवधेन हरति विवधिकः। विवधिकी। वीवधिकः। वीवधिकी। ठक् खल्वपि – वैवधिकः। वैवधिकी।

विवधवीवधशब्दौ समानार्थौ पथि [13]पर्याहारे च वर्तेते ॥

## अण् कुटिलिकायाः। (१८/१५६८)

हरति इत्येव। कुटिलिकाशब्दात् [14]तृतीयासमर्थाद् अण् प्रत्ययो भवति हरति इत्येतस्मिन्नर्थे। कुटिलिकया हरति [15]मृगो व्याधं कौटिलिको [16]मृगः। कुटिलिकया हरत्यङ्गारात् कौटिलिकः [17]कर्मारः। [18]कुटिलिका वक्रगतिः, कर्माराणामायुधकर्षणी लोहमयी यष्टिश्चोच्यते ॥

---

1. तेन इत्येव इत्यधिकम् फ. 2. तेन इत्यधिकम् फ. 3. अर्थे फ. 4. तेन इत्येव नास्ति फ 5. नयति उपादत्ते वा क. फ, उत्सङ्गेन हरति नास्ति ड. 6. औत्तुपिकः ड. 7. उत्तुप ड, उत्पुर ह. 8. उत्तप उत्फट ड. 9. पिटका इ, पिठक ड, पिटाक क. ह. 10. प्रत्ययार्थे फ. 11. भरटैः भृत्यैः हरति इत्यधिकम् फ. 12. पक्षे इत्यधिकम् क. 13. पर्यायाहारे क, उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते फ. 14. तृतीयासमर्थात नास्ति फ. 15. मृगान् व्याधः फ, मृगं व्याधः ब. 16. व्याधः फ. 17. कर्मकारः ड. ह. 18. वाक्यमिदं नास्ति ब. ड. ह.